# shrIshankarAchAryabhujangaprayAta stotram

# શ્રીશઙ્કરાચાર્યભુજઙ્ગપ્રયાતસ્તોત્રમ્

## Document Information

Text title : majjagadgurusha.nkarAchAryabhuja.ngaprayAtastotra

File name : shankarAchAryabhujangaprayAtastotra.itx

Category : deities_misc, bhujanga, shankarAchArya, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_deities_misc

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI mahAsvAmibhiH

Transliterated by : Ramakrishna Upadrasta

Proofread by : Sunder Hattangadi.com Ramakrishna Upadrasta, PSA Easwaran

Latest update : May 21, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 26, 2023

*sanskritdocuments.org*

# શ્રીશઙ્કરાચાર્યભુજઙ્ગપ્રયાતસ્તોત્રમ્

કૃપાસાગરાયાશુકાવ્યપ્રદાય પ્રણમ્રાખિલાભીષ્ટસન્દાયકાય ।
યતીન્દ્રૈરુપાસ્યાઙ્ઘ્રિપાથોરુહાય પ્રબોધપ્રદાત્રે નમઃ શઙ્કરાય ॥ ૧॥

ચિદાનન્દરૂપાય ચિન્મુદ્રિકોદ્યત્કરાયેશપર્યાયરૂપાય તુભ્યમ્ ।
મુદા ગીયમાનાય વેદોત્તમાઙ્ગૈઃ શ્રિતાનન્દદાત્રે નમઃ શઙ્કરાય ॥ ૨॥

જટાજૂટમધ્યે પુરા યા સુરાણાં ધુની સાદ્ય કર્મન્દિરૂપસ્ય શમ્ભોઃ ।
ગલે મલ્લિકામાલિકાવ્યાજતસ્તે વિભાતીતિ મન્યે ગુરો કિં તથૈવ ॥ ૩॥

નખેન્દુપ્રભાધૂતનમ્રાલિહાર્દાન્ધકારવ્રજાયાબ્જમન્દસ્મિતાય ।
મહામોહપાથોનિધેર્બાડબાય પ્રશાન્તાય કુર્મો નમઃ શઙ્કરાય ॥ ૪॥

પ્રણમ્રાન્તરઙ્ગાબ્જબોધપ્રદાત્રે દિવારાત્રમવ્યાહતોસ્રાય કામમ્ ।
ક્ષપેશાય ચિત્રાય લક્ષ્મક્ષયાભ્યાં વિહીનાય કુર્મો નમઃ શઙ્કરાય ॥ ૫॥

પ્રણમ્રાસ્યપાથોજમોદપ્રદાત્રે સદાન્તસ્તમસ્તોમસંહારકર્ત્રે ।
રજન્યામપીદ્ધપ્રકાશાય કુર્મો હ્યપૂર્વાય પૂષ્ણે નમઃ શઙ્કરાય ॥ ૬॥

નતાનાં હૃદબ્જાનિ ફુલ્લાનિ શીઘ્રં કરોમ્યાશુ યોગપ્રદાનેન નૂનમ્ ।
પ્રબોધાય ચેત્થં સરોજાનિ ધત્સે પ્રફુલ્લાનિ કિં ભો ગુરો બ્રૂહિ મહ્યમ્ ॥ ૭॥

પ્રભાધૂતચન્દ્રાયુતાયાખિલેષ્ટપ્રદાયાનતાનાં સમૂહાય શીઘ્રમ્।
પ્રતીપાય નમ્રૌઘદુઃખાઘપઙ્ક્તેર્મુદા સર્વદા સ્યાન્નમઃ શઙ્કરાય ॥ ૮॥

વિનિષ્કાસિતાનીશ તત્ત્વાવબોધાન્નતાનાં મનોભ્યો હ્યનન્યાશ્રયાણિ ।
રજાંસિ પ્રપન્નાનિ પાદામ્બુજાતં ગુરો રક્તવસ્ત્રાપદેશાદ્બિભર્ષિ ॥ ૯॥

મતેર્વેદશીર્ષાધ્વસમ્પ્રાપકાયાનતાનાં જનાનાં કૃપાર્દ્રૈઃ કટાક્ષૈઃ ।
તતઃ પાપવૃન્દસ્ય શીઘ્રં નિહન્ત્રે સ્મિતાસ્યાય કુર્મો નમઃ શઙ્કરાય ॥ ૧૦॥

સુપર્વોક્તિગન્ધેન હીનાય તૂર્ણં પુરા તોટકાયાખિલજ્ઞાનદાત્રે ।
પ્રવાલીયગર્વાપહારસ્ય કર્ત્રે પદાબ્જમ્રદિમ્ના નમઃ શઙ્કરાય ॥ ૧૧॥

ભવામ્ભોધિમગ્નાઞ્જનાન્દુઃખયુક્તાઞ્જવાદુદ્દિધીર્ષુર્ભવાનિત્યહોઽહમ્ ।
વિદિત્વા હિ તે કીર્તિમન્યાદૃશાં ભો સુખં નિર્વિશઙ્કઃ સ્વપિમ્યસ્તયત્નઃ ॥ ૧૨॥

॥ ઇતિ શ્રીસચ્ચિદાનન્દ-શિવાભિનવ-નૃસિંહભારતી મહાસ્વામિભિઃ શ્રીકાલટિક્ષેત્રે
વિરચિતં શ્રીશઙ્કરાચાર્યભુજઙ્ગપ્રયાતસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Ramakrishna Upadrasta

Proofread by Ramakrishna Upadrasta, Sunder Hattangadi, PSA Easwaran

*shrIshankarAchAryabhujangaprayAta stotram*

pdf was typeset on October 26, 2023

Please send corrections to *sanskrit@cheerful.com*